Research Paper E-ISSN NO : 2455-295X | VOLUME : 5 | ISSUE : 7 | JULY 2019

# शिवमहापुराणानुसार सृष्टि प्रक्रिया: एकम् अध्ययनम्
# (SHIVAMAHAAPURAANAANUSAAR SRSHTI PRAKRIYA: EKAM ADHYAYANAM)

**DR. SANJAYKUMAR RATANSING VASAVA [1]**

[1] ASSISTANT PROFESSOR, GOVT. ARTS & COMMERCE COLLEGE, NETRANG, DI.BHARUCH (GUJARAT) -393130

**ABSTRACT:**

**KEYWORDS:**

ब्रह्मातः आरभ्य तृणपर्यन्तं यत् किमपि दृश्यते तद् सर्वं शिवरुपम् अस्ति। अत्रोक्तं यत् यदा शिवस्य इच्छा भवति तदा संसारस्य रचना भवति। सः सर्वज्ञः अस्ति, तं कोऽपि ज्ञातुं न शक्नोति। शिवः संसारस्य रचना तथा करोति येन सः प्रविष्टः सन् निर्लिप्तः भवति। सः ज्ञानस्वरुपी अस्ति। एतस्य कृते शिवमहापुराणे उदाहरणमस्ति यत् यथा जले सूर्यप्रकाशः दृश्यते किन्तु वस्तुतः सः तु प्रतिबिम्बः भवति। जले केवलं प्रकाशप्रवेशस्य भ्रममात्रं भवति तथैव शिवः अपि सृष्टिकर्ता अस्तीति भासते।[१] सः नित्यः, सत्-असत् -तथा लोकानां सर्जकः, प्रधानपुरुषश्च शिवः अस्ति। येन इमा सृष्टिः निर्मिता।[२]

हे शिव भवानेव संसारस्य स्त्रष्टा, पालनकर्ता, विनाशकर्ता च अस्ति। स्वानुसारं शिवशक्त्या ऊर्णनाभस्य जालेन सदृशीं क्रीडां करोति। [३] अर्थात् यथा ऊर्णनाभः स्वसृणिकया जालं रचयति पुनश्च तद् जालं स्वयमेव निर्गलति, तथैव शिवशक्त्या संसाररुपी तन्तवः उद्भवन्ति, तस्मिन् एव लयं प्राप्नुवन्ति।

शिवमहापुराणस्य वायवीयसंहितायाः पूर्वभागे सृष्टिप्रक्रियायाः वर्णनं प्राप्यते।[४] अर्थात् प्रधानतः बुद्धिः उत्पन्ना। महत्तत्त्वे विक्षेपकारणात् त्रिप्रकारकः अहङ्कारः उत्पन्नः भवति। अहङ्कारात् पञ्चमहाभूतानि,पञ्चतन्मात्राः, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियानि, मनश्च उत्पन्नाः। शैवदर्शने सृष्टिसंरचनायाः स्वीकारः कृतः अस्ति। तेषां मते शिव-शक्ति-सदाशिव-ईश्वर-विद्या एतानि पञ्चतत्त्वानि शुद्धसृष्टेः उच्यन्ते। सदाशिवतत्त्वम्, समुद्रे तस्य इच्छया उच्छालनात्मकस्पन्दनात् उत्पन्नस्य तत्त्वस्य नाम शिवः अस्ति। एतस्मिन् अवस्थायां सूक्ष्मरुपेण प्रमेयतायाः किञ्चित् आभासः आरब्धः भवति।

शिवमहापुराणस्य उमासंहितायामे उत्पत्ति-स्थिति-लयानां कारणभूतानां ब्रह्मा-विष्णु-महेशानाम् उत्पत्तिः कथं जाता इति उल्लेखः प्राप्यते। शिवस्य दक्षिणभागात् सर्जनकर्ताब्रह्मणः, वामभागात् पालनकर्ताविष्णोः, हृदयात् संहारकशिवस्य च उत्पत्तिः भवति। रुद्रः सम्पूर्णचराचरस्य जगतः संहारं करोति। अत्र रुद्रः महादेवनाम्ना ज्ञायते। यश्च प्रलयकाले समस्तचराचरं भुक्त्वा स्थिरः भवति।[५]

यदा यदा शिवेन सृष्टिः निर्मीयते तदा तदा ब्रह्मा सर्जकः, विष्णुः पालकः, महेशः संहारकः च भवन्ति। तस्मात् अधिकतरः कोऽपि नास्ति।[६] शिवपुराणे सृष्टिप्रक्रिया प्रकारद्वयेन निरुपिता।

ब्रह्मा यदा विविधाः सृष्टीः रचयितुम् इष्टवान् तदा सः प्रप्रथमं जलम् अरचयत्। तस्मिन् जले सः वीर्यम् अस्थापयत् तत् ''नाश''इति उच्यते। वीर्यं सुवर्णेन सदृशं जातम् तदनु ब्रह्मा यज्ञम् आयोजितवान्। अण्डेऽस्मिन् हिरण्यगर्भः एकं वर्षम् उषितवान्। अण्डस्य भागद्वयम् अभवत्, एकः भागः स्वर्गनाम्ना द्वितीयः च भूलोकनाम्ना ज्ञायते, यस्योपरी चतुर्दशभुवनानि सन्ति। द्वयोः मध्ये भगवता आकाशम् निर्मितम्।[७]

ब्रह्मणा सृष्टिरचनायै शिव-विष्णोः ध्यानं कृतम्। सर्वारम्भे जलं निर्मितम्, तस्मिन् अञ्जल्या जलं स्थापितम्। एतस्मात् जलात् चतुर्विंशती-तत्त्वयुक्तम् अण्डम् उत्पम्। तच्च जलस्वरुपे न दृष्टम्, किन्तु अण्डेन विराटस्वरुपं स्वीकृतम्। एतेन शङ्कीतः ब्रह्मा द्वादशवर्षाणि विष्णोः ध्यानं कृतवान्। तपस्यायाः फलस्वपुरेण विष्णुं प्रकटीतः। ब्रह्मा तस्य स्तुतिं कुर्वन् वदति यत् ''हे विष्णो ! भवान् शिवकृपया उत्पन्नः अतः भवान् शिवशक्त्या अण्डं चेतयतु। यः अण्डः आरम्भे अचेतनः आसीत् तस्मिन् ब्रह्मणः प्रार्थनया शिवस्य आज्ञया च विष्णुः अन्नतरुपाणि धृत्वा अण्डं चेतनं कृतवान्। सः पुरुषः सहस्त्रशीर्ष-नेत्र-पादयुक्तः अण्डे व्याप्तः जातः। पातालात् आरभ्य सप्तलोकपर्यन्तस्य स्वामी हरिः स्वयं विराटपुरुषस्वरुपेण सुशोभितः जातः। तदनु ब्रह्मा अष्टप्रकारकाः सृष्टीः अरचयत्।[८]

विष्णोः सहस्त्रभागात् पितामहब्रह्मणः उत्पत्तिः जाता। यः सद्योजातादीनाम् आत्मा तथा पृथ्वीतत्त्वस्य नायकः अस्ति। जगतसर्जकब्रह्मणः वामभागे सरस्वती-शक्तिः विराजते। ब्रह्मणः चत्वारि मुखानि सन्ति। रजोगुणयुक्तः अस्तीति सः रक्तवर्णीयः अस्ति। हिरण्यगर्भः, विराटः, पुरुषः, कालः च ब्रह्मणः व्यष्टिरुपाः सन्ति। तस्य कार्यं प्रकृतौ ये लीनाः भवन्ति तेभ्यः भोगसाधनानि, स्त्री-पुत्र-धन-फलादि दत्त्वा ते संसारे योजनियाः इत्यस्ति। एषा एव सृष्टिप्रक्रिया उच्यते, यया प्राणिनः सुखं प्राप्नुवन्ति।[९]

रुद्रस्य सहस्त्रभागात् विष्णुः उत्पन्नः। सः वामदेवचक्रस्य आत्मा तथा जलतत्त्वस्य नायकः अस्ति। तस्य वामभागे रमाशक्तिः अस्ति। सः सर्वप्राणीनां रक्षणं करोति। तस्य बाह्यं स्वरुपं पश्यामः चेत् सः चतुर्भुजः, कमलनयनः, श्यामवर्णीयः, शङ्खी च अस्ति। विष्णोः वासुदेव-सङ्कर्षण-अनिरुद्ध-प्रद्युम्न एतानि चत्वारि रुपाणि सन्ति। विष्णुः स्वकार्येण ब्रह्मणा उत्पादितान् फल-उपभोगकर्तॄन् कर्मभोगपर्यन्तं पालयति रक्षयति च।[१०]

महेश्वरस्य सहस्रभागात् रुद्रः उत्पन्नः। सः भयङ्करवदनः तथा तेजयुक्तः अस्ति। रुद्रस्य वामभागे गौरीशक्तिः अस्ति। सः संहारकः प्रभुः अस्ति। शिव-हर-मुण्ड-भव-संहार इत्यादयः सुप्रसिद्धाः संहारकचक्ररुपाः सन्ति। जीवानां विश्रामस्थानाय कर्मपरिपाकाय च रुद्रस्य शस्त्राणि त्रिविधानि कल्पितानि।

- नित्यानि - जीवसुषुप्तावस्थायां भवति सः नित्यसंहारः उच्यते।
- नैमित्तिकानि - जीवस्य परब्रह्मणि लीनता नैमित्तिकसंहारः उच्यते।
- विलयानि – परब्रह्मणि लयः विलयसंहारः उच्यते।[११]

वायवीय-संहितायाः पूर्वभागे सृष्टिपालनप्रलयकर्तुत्वनामके अध्याये सृष्ट्योत्पत्तेः कथा प्राप्यते यत् प्रथमं शक्तिः उत्पन्ना सा शान्त्यतीत उच्यते। तदनु शिवेन माया निर्मीता। मायातः अव्यक्तप्रकृतिः जाता। शान्तिपदः प्रथमः भवति तदनु विद्यापदः प्रतिष्ठापदः निवृत्तिः च आगच्छन्ति। अयमीश्वरस्य सृष्टिक्रमः अस्ति। यदा ब्रह्मणः परार्धद्वयं समाप्तं भवति तदा प्रलयः भवति। तदा अव्यक्तात्मनः कार्यं समाप्य आत्मा स्थितः भवति। यदा आत्मस्थितजगतः प्रलयः भवति तदा प्रधान-पुरुषौ समानधर्मे स्थितौः भवतः। अतः तमोगुणः सत्त्वगुणश्च परस्परं योजिताः भवन्ति। इत्थं द्वयोः भिन्नता न भवति। प्रलयकाले वायुः अपि जलेन सदृशः स्थिरः भवति।

संसारस्य अज्ञात - अवस्थायाम् एकमात्रं परमतत्त्वं रात्रौ स्थितं भवति। रात्रिः समाप्ता भवति तदा महेश्वरः स्वमायया प्रधानपुरुषयोः प्रविश्य तौ चलायमानौ कुरुतः। अनन्तरं सर्वेषाम् उत्पत्तेः इच्छया शिवाज्ञया च सृष्टिः अव्यक्ता भवति। अनुलोमक्रमेण सृष्टिः आरब्धा भवति, प्रतिलोमक्रमेण च संहारः भवति। महतः आरभ्य विशेषपर्यन्तं यद् किमपि उत्पद्यते तद् अव्यक्तस्य तथा जीवस्य कार्यं नास्ति। प्रकृतिः अचेतना अस्ति। पुरुषः अज्ञानी अस्ति। अतः परमाणु - प्रधानादि सर्वं अचेतन अस्ति। अतः ज्ञानिभिः कारणरहितं शिवस्य कर्तृत्वं दृष्टम्। संसारोऽयं कर्तुः अपेक्षां करोति, यतोऽहि कार्यमिदं सावयवम् अस्ति, अतः समर्थः अनादि, अनन्तः महादेवः एव संसारस्य रचयिता अस्ति। सः एव रक्षकः विनाशकः च अस्ति।[१२]

## पादटीप

१ शिवमहापुराण, कोटिरुद्रसंहिता ४३/४-७

२ शिवमहापुराण, उमासंहिता, २९/५

३ शिवमहापुराण, रुद्रसंहिता(सृष्टिखंड), ४०/४

४ शिवमहापुराण, वायवीयसंहिता, पूर्व- १०/१३-१६

५ शिवमहापुराण, उमासंहिता, २९/९-१४

५ शिवमहापुराण, उमासंहिता, २९/९

७ शिवमहापुराण, उमासंहिता, २९/१०-१३

८ शिवमहापुराण, रुद्रसंहिता(सृष्टिखंड), १५/२३-२८

९ शिवमहापुराण, कैलाशसंहिता, १५/३०-३५

१० शिवमहापुराण, कैलाशसंहिता, १५/२१-२६

११ शिवमहापुराण, कैलाशसंहिता, १५/११-१६

१२ शिवमहापुराण, वायवीयसंहिता(पूर्व) अध्याय-९